५

५७. सचि रूप संज्ञ अपि वेदन चेतनायां
चित्तं अनित्य परिणामयि बोधिसत्त्वो।
प्र(ति)वर्णिकाय चरते अप्रजानमानो
न हि धर्म पण्डित विनाश करोति जातु॥ १॥

५८. यस्मिन् न रूप अपि वेदन चापि संज्ञा
विज्ञान नैव न पि चेतनयोपलब्धिः।
अनुपादु शून्य न य जानति सर्वधर्मान्
एषा स प्रज्ञवरपारमिताय चर्या॥ २॥

५९. यावन्ति गङ्गनदिवालिकतुल्यक्षेत्रे
तावन्ति सत्त्व अरहन्ति विनेय कश्चित्।
यश्चैव प्रज्ञ इम पारमिता लिखित्वा
परसत्त्वि पुस्तकु ददेय विशिष्टपुण्यः॥ ३॥

६०. किं कारणं त इह शिक्षित वादिश्रेष्ठा
गमयन्ति धर्म निखिलानिह शून्यतायाम्।
यां श्रुत्व श्रावक स्पृशन्ति विमुक्ति शीघ्रं
प्रत्येकबोधि स्पृशयन्ति च बुद्धबोधिम्॥ ४॥

६१. असतोऽङ्कुरस्य द्रुमसंभवु नास्ति लोके
कुत शाखपत्रफलपुष्पउपादु तत्र।
विन बोधिचित्त जिनसंभवु नास्ति लोके
कुत शक्रब्रह्मफल श्रावकप्रादुभावः॥ ५॥

६२. आदित्यमण्डलु यदा प्रभजाल मुञ्ची
कर्मक्रियासु तद सत्त्व पराक्रमन्ति।
तथ बोधिचित्त सद लोकविदुस्य ज्ञातो
ज्ञानेन सर्वगुणधर्म समागमन्ति॥६॥

६३. यथ नोपतप्त असतो भुजगाधिपस्य
कुत नद्यप्रस्रवु भवेदिह जम्बुद्वीपे।
असता नदीय फलपुष्प न संभवेयुः
न च सागराण रतना भवि नैकरूपाः॥७॥

६४. तथ बोधिचित्त असतीह तथागतस्य
कुत ज्ञानप्रस्रवु भवेदिह सर्वलोके।
ज्ञानस्य चो असति नास्ति गुणान वृद्धिः
न च बोधि सागरसमा न च बुद्धधर्माः॥८॥

६५. यावन्ति लोकि क्वचि जोतिकप्राणभूता
ओभासनार्थ प्रभ ओसरयन्ति सर्वे।
वरसूर्यमण्डलविनिःसृत एकरश्मी
न कला पि ज्योतिकगणे सिय सर्वआभाः॥९॥

भगवत्यां रत्नगुणसंचयगाथायां पुण्यपर्यायपरिवर्तो नाम पञ्चमः॥